यस्यां भेदप्रभेदेन चतुःषष्टिरुजः स्मृताः ।
मृत्युकन्यासुतास्वेव जरा तस्याश्च कन्यका ।
जरा च भ्रातृभिः सार्द्धं शश्वद्भ्रमति भूतलम् ॥
एते चोपायवेत्तारं न गच्छन्ति च संयतम् ।
पलायन्ते च तं दृष्ट्वा वैनतेयमिवोरगाः ॥
चक्षुर्जलञ्च व्यायामः पादाधस्तैलसेवनम् ।
कर्णयोर्मूर्द्ध्नि तैलञ्च जराव्याधिविनाशकम् ॥
वसन्ते भ्रमणं वह्निसेवां स्वल्पां करोति यः ।
बालाञ्च सेवते काले जरा तं नोपगच्छति ॥
स्नानशीतोदकस्नायी सेवते चन्दनद्रवम् ।
नोपयाति जरा तञ्च निदाघेऽनिलसेविनम् ॥
प्रावृष्युष्णोदकस्नायी घनतोयं न सेवते ।
समये च समाहारी जरा तं नोपगच्छति ॥
शारदं नं व गृह्णाति भ्रमणन्तत्र वर्ज्जयेत् ।
खातस्नायी समाहारी जरा तं नोपतिष्ठते ॥
वातस्नायी च हैमन्ते काले वह्निं निषेवते ।
भुङ्क्ते नवान्नमुष्णञ्च जरा तं नोपगच्छति ॥
शिशिरेऽशुकवह्निञ्च नवोष्णान्नञ्च सेवते ।
य उष्णोदकस्नायी जरा तं नोपगच्छति ॥
सद्योमांसं नवान्नञ्च बाला स्त्री क्षीरभोजनम् ।
घृतञ्च सेवते यो हि जरा तं नोपगच्छति ॥
भुङ्क्ते सदन्नं क्षुत्काले तृष्णायां पीयते जलम् ।
नित्यं भुङ्क्ते च ताम्बूलं जरा तं नोपगच्छति ॥
दधि हैयङ्गवीनञ्च नवनीतं तथा गुड़म् ।
नित्यं भुङ्क्ते संयमी यो जरा तं नैव गच्छति ॥
शुष्कमांसं स्त्रियं वृद्धां बालार्कन्तरुणं दधि ।
संसेवन्तं जरा याति प्रहृष्टा भ्रातृभिः सह ॥
रात्रौ ये दधि सेवन्ते पुंश्चलीञ्च रजस्वलाम् ।
तानुपैति जरा हृष्टा भ्रातृभिः सह सुन्दरि ! ॥
रजस्वला च कुलटा चावीरा जारदूतिका ।
शूद्रयाजकपत्नी या ऋतुहीना च या सति ! ॥
यो हि तासामन्नभोजी ब्रह्महत्यां लभेत्तु सः ।
तेन पापेन सार्द्धं सा जरा तमुपगच्छति ॥
पापानां व्याधिभिः सार्द्धं मित्रता सन्ततं ध्रुवम् ।
पापं व्याधिजराबीजं विघ्नबीजञ्च निश्चितम् ॥
पापेन जायते व्याधिः पापेन जायते जरा ।
पापेन जायते दैन्यं दुःखं शोको भयङ्करः ॥
तस्मात् पापं महावैरं दोषबीजममङ्गलम् ।
भारते सततं सन्तो नाचरन्ति भयातुराः ॥
स्वधर्म्माचारयुक्तञ्च दीक्षितं हरिसेवकम् ।
गुरुदेवातिथीनाञ्च भक्तं सक्तं तपःसु च ॥
व्रतोपवासयुक्तञ्च सदा तीर्थनिषेवकम् ।
रोगा द्रवन्ति तं दृष्ट्वा वैनतेयमिवोरगाः ॥
एतान् जरा न सेवेत व्याधिसङ्घश्च दुर्ज्जयः ।
सर्व्वं बोध्यमसमये काले सर्व्वं ग्रसिष्यति ॥”
इति ब्रह्मवैवर्त्ते ब्रह्मखण्डे । १ । १६ । ३३—५५ ॥
जराया औषधं यथा, गारुड़े १९६ अध्याये ।
“पलाशचूर्णं समधु गव्याज्यामलकान्वितम् ।
सविड़ङ्गं पीतमाज्ञं नरं कुर्य्याज्जराहृतम् ॥
मासेकेन महादेव ! जरामरणवर्ज्जितः ।
पलाशबीजं सघृतं तिलमध्वञ्चितं समम् ।
समाहं भक्षितं रुद्र ! जरां नयति संक्षयम् ॥”
अपिच ।
“भक्ष्णीकृतं भृङ्गराजस्य चूर्णं
तिलार्द्धकं चामलकार्द्धकञ्च ।
समाकरं भक्षति गुड़ैर्व्वा
न तस्य रोगो न जरा न मृत्युः ॥
अन्धः पश्यति गमनरहितो मत्तमातङ्गगामी
मूको वाग्मी श्रवणरहितो दूरशब्दानुसारी ।
नीरुग्गात्रो भवति पलितो नीलजीमूतकेशो
जीर्णा दन्ताः पुनरपि नवाः क्षीरगौरा भवन्ति ॥”
इति भैषज्यरत्नावल्यां भृङ्गराजादिचूर्णम् ॥
(“क्लैब्यं जरासम्भवं हि प्रवक्ष्याम्यथ तत् शृणु ॥
जघन्यमध्यप्रवरं वयस्त्रिविधमुच्यते ।
अथ प्रवयसां शुक्रं प्रायशः क्षीयते नृणाम् ॥
रसादीनां संक्षयाच्च तथैवावृष्यसेवनात् ।
बलवीर्य्येन्द्रियाणाञ्च क्रमेणैव परिक्षयात् ॥
परिक्षयादायुषश्चाप्यनाहारात् श्रमात् क्लमात् ।
जरासम्भवजं क्लैब्यं इत्येतैर्हेतुभिर्नृणाम् ॥
जायते तेन सोऽत्यर्थं क्षीणधातुः सुदुर्ब्बलः ।
विवर्णो विह्वलो दीनः क्षिप्रं व्याधिमथाश्नुते ॥
एतज्जरा सम्भवं हि ॥”
“जरासम्भवजे क्लैब्ये क्षयजे चैव कारयेत् ।
स्नेहस्वेदोपपन्नस्य सस्नेहं शोधनं हितम् ॥
क्षीरसर्पिर्व्वृष्ययोगा वस्तयश्चैव यापनाः ।
रसायनप्रयोगाश्च तयोर्भेषजमुच्यते ॥”
इति चरके चिकित्सास्थाने चिंशोऽध्याये ॥*॥
“या च भार्य्या विरूपाक्षी कश्मला कलहप्रिया ।
वचनोत्तरवक्त्री च सा जरा न जरा जरा ॥”
इति चाणक्यम् ॥*॥)
क्षीरिकावृक्षः । इति शब्दचन्द्रिका ॥ राक्षसी-विशेषः । यथा, श्रीभागवते ।
“अन्यस्यामपि भार्य्यायां शकले द्वे बृहद्रथात् ।
ते मात्रा बहिरुत्सृष्टे जरया चाभिसन्धिते ॥”
जरातुरः, त्रि, (जरया आतुरः ।) जीर्णः । जरारोगग्रस्तः । इति शब्दमाला ॥ (यथा, नैषधे । १ । १३५ ।
“मदेकपुत्त्रा जननी जरातुरा
नवप्रसूतिर्व्वरटा तपस्विनी ।
गतिस्तयोरेष जनस्तमर्द्दय-
न्नहो विधे ! त्वां करुणा रुणद्धि न ॥”)
जरापुष्टः, पुं, (जरया राक्षस्या पुष्टः ।) जरासन्धः । इति शब्दरत्नावली ॥
जराभीरुः, पुं, (जरातो भीरुः ।) कामदेवः । इति हेमचन्द्रः । २।१४१ ॥ जरामयघ्नीसी, त्रि ॥
जरायणिः, पुं, (जराया राक्षस्या अपत्यम् । जरा + बाहुलकात् फिः । तत्प्राप्तजीवत्वात् तथात्वम् ।) जरासन्धः । इति शब्दरत्नावली ॥
जरायुः, पुं, (जरामेतीति । जरा + इण् + “किंजरयोः श्रिणः ।” उणां १ । ४ । इति ञुण् ।) येन वेष्टितो गर्भः कुक्षौ तिष्ठति सः । गर्भवेष्टनचर्म्म । आँवोल इति भाषा । तत्पर्य्यायः । गर्भाशयः २ उल्बम् ३ कललः ४ । इत्यमरः । २ । ६ । ३७ ॥
“या तु चर्म्माकृतिः सूक्ष्मा जरायुः सा निगद्यते ॥”
इति महाभागवते भगवतीगीता ॥
अग्निजारवृक्षः । इति राजनिर्घण्टः ॥
जरायुजः, त्रि, (जरायौ जायते इति । जन + डः ।) गर्भाशयजातः । स तु नृगवादिः । इत्यमरः । ३ । १ । ५० ॥
“या तु चर्म्माकृतिः सूक्ष्मा जरायुः सा निगद्यते ।
शुक्रशोणितयोर्योगस्तस्मिन् संजायते यतः ।
तत्र गर्भो भवेद्यस्मात्तेन प्रोक्तो जरायुजः ॥”
इति महाभागवते भगवतीगीता ॥
जरासन्धः, पुं, (जरया तदाख्यया प्रसिद्धया राक्षस्या कृता सन्धा देहसंयोजनमस्य ।) चन्द्रवंशीयराजविशेषः । स तु बृहद्रथराजपुत्त्रः । कंसश्वशुरः द्वन्द्वयुद्धे भीमस्तं हतवान् । अस्य नामकरणं यथा,—
“अन्यस्यामपि भार्य्यायां शकले द्वे बृहद्रथात् ।
ते मात्रा बहिरुत्सृष्टे जरया चाभिसन्धिते ॥
जीव जीवेति क्रीडन्त्या जरासन्धोऽभवत् सुतः ॥”
इति श्रीभागवतम् ॥
तत्पर्य्यायः । बार्हद्रथिः २ । इति त्रिकाण्डशेषः ॥
(अस्य जन्मविवरणं महाभारते सभापर्व्वणि १७ अध्याये तथा मृत्युविवरणं तत्रैव २४ अध्याये द्रष्टव्यम् ॥ अयं हि विप्रचित्तिनामकस्यासुरस्यावतारः । यथा, महाभारते । १।६७।४ ।
“विप्रचित्तिरिति ख्यातो य आसीद्दानवर्षभः ।
जरासन्ध इति ख्यातः स आसीत् मनुजर्षभः ॥”
धृतराष्ट्रपुत्त्राणामन्यतमः । यथा, महाभारते । १ । ११७ । ८ ।
“दृढ़सन्धो जरासन्धः सत्यसन्धः सदःसुवाक् ॥”)
जरासन्धजित्, पुं, (जयतीति । जि + क्विप् । ततो जरासन्धस्य जित् जेता ।) भीमः । इति त्रिकाण्डशेषः ॥
जरी, [न्] त्रि, (जराऽस्यस्येति । जरा + इनिः ।) वृद्धः । इति हेमचन्द्रः । ३ । ४ ॥
जरूथं, क्ली, (जीर्य्यतीति । जॄ + “जॄवृञ्भ्यामूथन् ।” उणां । २ । ६ । इति ऊथन् ।) मांसम् । इति त्रिकाण्डशेषः ॥
जर्च्च, श उक्तौ । भर्त्से । इति कविकल्पद्रुमः ॥ (तुदां-परं-सकं-सेट् ।) श, जर्च्चती जर्च्चन्ती । शुणस्थानरहितानां तुदादिपाठफलन्तु शत्रन्तानां आदीपोरिति नुमो विभाषा वेदेषूच्चारणभेदश्च । भर्त्सस्तर्ज्जनम् । इति दुर्गादासः ॥
जर्च्छ, श उक्तौ । भर्त्से । इति कविकल्पद्रुमः ॥ (तुदां-परं-सकं-सेट् ।) श, जर्च्छती जर्च्छन्ती । भर्त्सस्तर्ज्जनम् । इति दुर्गादासः ॥
जर्ज्ज, श वाचि । भर्त्से । इति कविकल्पद्रुमः ॥ (तुदां-परं-सकं-सेट् ।) श, जर्ज्जती जर्ज्जन्ती । भर्त्सस्तर्ज्जनम् । इति दुर्गादासः ॥
जर्ज्जरः, पुं, (जर्ज्जति खड्गेनापरान् निन्दतीति । जर्ज्ज + बाहुलकात् अरः ।) शैलजः । (जर्ज्जति शत्रून् तर्ज्जयतीति ।) शक्रध्वजः । (जर्ज्जति भिन्नत्ति इति । कर्म्मणि बहुलवचनादरः ।)